"गुणाश्रिः संश्रयाद्ब्रह्मन् नैर्गुण्यं मन्यसे कथम् ।
न सन्ति प्रकृतेः सत्त्वादि गुणा यत्र ध्यानयोगे ।
तत्त्वध्यानयोगः । यथा, भागवते । ३ । २९।३२ ।
"ध्यानयोगश्च मन्निष्ठो नैर्गुण्यो भक्तिलक्षणः ॥")

नैर्म्मल्यं, क्ली, (निर्म्मलस्य भावः । इति ष्यञ् ।) निर्म्मलत्वम् । (तथा च हारीतेनोक्तम् ।
"जिह्वाक्लेदं जनयति तथा नेत्रनैर्म्मल्यकारी ॥")
विषयवैराग्यम् । यथा,—
"विषयेष्वतिसंरागो मानसो मल उच्यते ।
तेष्वेव हि विरागस्तु नैर्म्मल्यं समुदाहृतम् ॥"
इति प्रायश्चित्ततत्त्वम् ॥

नैल्यं, क्ली, (नीलस्य भावः । ष्यञ् ।) नीलिमा । इति मुग्धबोधटीकायां रामतर्कवागीशः ॥

नैविड्यं, क्ली, वंशप्रभृतकारगुणविशेषः । यथा,—
"नैविड्यं प्रौढ़ता चापि सुस्वरत्वञ्च शीघ्रता ।
माधुर्य्यमिति पञ्चामी फुत्कृतेषु गुणाः स्मृताः ॥"
इति सङ्गीतदामोदरः ॥
(निविड़स्य भावः । निविड़+ष्यञ् ।) निविड़ता च ॥

नैवेद्यं, क्ली, (निवेदं निवेदनमर्हतीति । निवेद+ष्यञ् ।) देवाय निवेदनीयद्रव्यम् । तस्य निरुक्तिर्यथा,—
"चतुर्व्विधं कुलेशानि द्रव्यं तं षड्रसान्वितम् ।
निवेदनात् भवेत्तृप्तिर्नैवेद्यं तदुदाहृतम् ॥"
इति कुलार्णवे १७ उल्लासः ॥
तद्द्रव्याणि यथा,—
"ससितेन सुशुद्धेन पायसेन ससर्पिषा ।
सितोदनं सकदलिदध्याद्यैश्च निवेदयेत् ॥"
इति प्रपञ्चसारः ॥
तत् पञ्चविधम् । यथा,—
"निवेदनीयं यद्द्रव्यं प्रशस्तं प्रयतं तथा ।
तद्भक्ष्यादि पञ्चविधं नैवेद्यमिति कथ्यते ॥
भक्ष्यं भोज्यञ्च लेह्यञ्च पेयं चूष्यञ्च पञ्चमम् ।
सर्व्वत्र चैतन्नैवेद्यमाराध्यायै निवेदयेत् ॥" * ॥
तत्र पात्रं यथा,—
"तैजसेषु च पात्रेषु सौवर्णे राजते तथा ।
ताम्रे वा प्रस्तरे वापि पद्मपत्रेऽथवा पुनः ॥
यज्ञदारुमये वापि नैवेद्यं स्थापयेद्बुधः ।
सर्व्वाभावे च माहेये स्वहस्तघटिते यदि ॥"
इति तन्त्रसारः ॥ * ॥
तद्दानफलं यथा,—
"नैवेद्येन भवेत् स्वर्गो नैवेद्येनामृतं भवेत् ।
धर्म्मार्थकाममोक्षाश्च नैवेद्येषु प्रतिष्ठिताः ॥
सर्व्वयज्ञफलं नित्यं नैवेद्यं सर्व्वतुष्टिदम् ।
ज्ञानदं मानदं पुण्यं सर्व्वभोग्यमयं तथा ॥
मनसापि महादेव्यै नैवेद्यं दातुमिच्छति ।
यो नरो भक्तियुक्तः सन् दीर्घायुः स सुखी भवेत् ॥
महामायां कदा देवीमर्चयिष्यामि प्रहृतः ।
नानाविधैस्तु नैवेद्यैरिति चिन्ताकुलस्तु यः ।
स सर्व्वकामान् संप्राप्य मम लोके महीयते ॥"
इति कालिकापुराणे । ६९।७० । अध्यायः ॥
तत्कालो यथा,—
"अर्व्वाक् विसर्ज्जनाद्द्रव्यं नैवेद्यं सर्व्वमुच्यते ।
विसर्ज्जिते जगन्नाथे निर्म्माल्यं भवति क्षणात् ॥
पञ्चरात्रविदो मुख्या नैवेद्यं भुञ्जते सुखम् ॥"
इति गरुड़पुराणम् ॥
तस्य स्थापनक्रमो यथा,—गौतमीये ।
"नैवेद्यं दक्षिणे भागे पुरतो वा न पृष्ठतः ॥
दक्षिणभागस्तु देवताया एव न तु साधकस्य ।
पक्वञ्च देवतावामे आमान्नञ्चैव दक्षिणे ॥
पुरश्चरणचन्द्रिकायाम् ।
दक्षिणन्तु परित्यज्य वामे चैव निधापयेत् ।
अभोज्यं तद्भवेदन्नं पानीयञ्च सुरोपमम् ॥"
इति तन्त्रसारः ॥
तन्मुद्रा यथा,—
"नैवेद्यमुद्रामङ्गुष्ठकनिष्ठाभ्यां प्रदर्शयेत् ।
कनिष्ठानामिकाङ्गुष्ठैर्मुद्रा प्राणस्य कीर्त्तिता ॥
तर्ज्जनीमध्यमाङ्गुष्ठैरपानस्य तु मुद्रिका ।
अनामामध्यमाङ्गुष्ठैरुदानस्य तु सा स्मृता ॥
तर्ज्जन्यनामामध्याभिः साङ्गुष्ठाभिश्चतुर्थिका ।
सर्व्वाभिः सा समानस्य प्राणाद्यन्तेषु योजिता ॥
तारपूर्व्वां जपेन्मुद्रां प्राणादीनां प्रदर्शयेत् ॥"
इति यामलः ॥
ब्राह्मणाय तत्समर्पणं यथा,—
"साक्षात् खादति नैवेद्यं विप्ररूपी जनार्द्दनः ।
ब्राह्मणे परितुष्टे च सन्तुष्टाः सर्व्वदेवताः ॥
देवाय दत्त्वा नैवेद्यं द्विजाय न प्रयच्छति ।
भस्मीभूतञ्च नैवेद्यं पूजनं निष्फलं भवेत् ॥
देवदत्तं न भोक्तव्यं नैवेद्यञ्च विना हरेः ।
प्रशस्तं सर्व्वदेवेषु विष्णोर्नैवेद्यभोजनम् ॥"
शूद्रस्य तद्भक्षणविधिर्यथा,—
शूद्रश्चेद्धरिभक्तश्च नैवेद्यभोजनोत्सुकः ।
आमान्नं हरये दत्त्वा पाकं कृत्वा च खादति ॥"
इति श्रीकृष्णजन्मखण्डे २१ अध्यायः ॥ * ॥
विष्णुनैवेद्यभोजनफलादि स्कान्दे ।
"कृत्वा चैवोपवासन्तु भोक्तव्यं द्वादशीदिने ।
नैवेद्यं तुलसीमिश्रं हत्याकोटिविनाशनम् ॥
पाद्मे ।
हृदि रूपं मुखे नाम नैवेद्यमुदरे हरेः ।
पादोदकञ्च निर्म्माल्यं मस्तके यस्य सोऽच्युतः ॥
स्कान्दे ।
अग्निष्टोमसहस्रैश्च वाजपेयशतैस्तथा ।
तुल्यं फलं भवेद्देवि ! विष्णोर्नैवेद्यभक्षणात् ॥
पादोदकञ्च निर्म्माल्यं नैवेद्यञ्च विशेषतः ।
महाप्रसाद इत्युक्त्वा ग्राह्यं विष्णोः प्रयत्नतः ॥
बहृचपरिशिष्टे ।
पवित्रं विष्णुनैवेद्यं सुरसिद्धर्षिभिः स्मृतम् ।
अन्यदेवस्य नैवेद्यं भुक्त्वा चान्द्रायणञ्चरेत् ॥
स्वदत्तमिति विशेषणीयम् ॥ स्मृतौ ।
ब्रह्मचारिगृहस्थैश्च वनस्थयतिभिस्तथा ।
भोक्तव्यं विष्णुनैवेद्यं नात्र कार्य्या विचारणा ॥"
इत्येकादशीतत्त्वम् ॥
अपि च ।
"विष्णोर्निवेदितं पुण्यं नैवेद्यं वा फलं जलम् ।
प्राप्तिमात्रेण भोक्तव्यं त्यागेन ब्रह्महा जनः ॥
भस्मीभूतपुष्पञ्च भस्मानो भवेन्नरः ।
यस्त्वनैवेद्यं विष्णुनैवेद्यं भाग्येनोपस्थितं शुभम् ॥
प्राप्तिमात्रेण यो भुङ्क्ते भक्त्या विष्णुनिवेदितम् ।
पुंसां शतं समुद्धृत्य जीवन्मुक्तः स्वयं भवेत् ॥
विष्णुनैवेद्यभोजी यो नित्यं वा प्रणमेद्धरिम् ।
पूजयेत् स्तौति वा भक्त्या स विष्णुसदृशो भवेत् ॥
पुंश्चल्यन्नमवीरान्नं शूद्रश्राद्धान्नमेव च ।
यद्धरेरनिवेद्यञ्च वृथामांसमभक्ष्यम् ॥
शिवलिङ्गप्रदत्तान्नं यदन्नं शूद्रयाजिनाम् ।
चिकित्सकद्विजान्नञ्च देवलान्नं तथैव च ॥
कन्याविक्रयिणामन्नं यदन्नं योनिजीविनाम् ।
अमुद्धान्नं पर्य्युषितं सर्व्वभक्ष्यावशेषकम् ॥
शूद्रापतिद्विजान्नञ्च वृषवाहद्विजान्नकम् ।
अदीक्षितद्विजानाञ्च यदन्नं शवदाहिनाम् ॥
अगम्यागामिनाञ्चैव द्विजानामन्नमेव च ।
मित्रद्रुहां कृतघ्नानामन्नं विश्वासघातिनाम् ॥
मिथ्यासाक्ष्यप्रदानाञ्च ब्राह्मणानान्तथैव च ।
एतत् सर्व्वं विशुध्येत विष्णोर्नैवेद्यभक्षणात् ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ६० अध्यायः ॥ * ॥
"विष्णोर्निवेदितान्नेन यष्टव्याः सर्व्वदेवताः ।
पितरोऽतिथयश्चैवमिति वेदेषु विश्रुतम् ॥
अमृतं सर्व्ववस्तूनां मिष्टं सारं सुदुर्लभम् ।
विष्णोर्निवेदितान्नस्य कलां नार्हन्ति षोड़शीम् ॥
यदृच्छया तन्नैवेद्यं यो भुङ्क्ते साधुसङ्गतः ।
षष्टिवर्षसहस्राणां प्राप्नोति तपसां फलम् ॥
यो निवेद्य हरिं भुङ्क्ते भक्त्या भुक्तञ्च नित्यशः ।
किं वा तपस्या सुतरां स हरेस्तेजसा समः ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे १७ अध्यायः ॥
शिवनैवेद्ये विशेषो यथा, बहृचपरिशिष्टे ।
"अग्राह्यं शिवनैवेद्यं पत्रं पुष्पं फलं जलम् ।
शालग्रामशिलास्पर्शात् सर्व्वं याति पवित्रताम् ॥
शालग्रामशिलायां शिवपूजने तद्ग्राह्यम्
इत्याह्निकतत्त्वम् ॥" कालिकापुराणे ।
"यो यद्देवार्च्चनरतः स तन्नैवेद्यभक्षकः ।
केवलं सौरशैवे तु वैष्णवो नैव भक्षयेत् ॥"
वैष्णवपदमन्यदेवोपासकपरम् ।
'समानस्त्वन्यनैवेद्यं भक्षयेदन्यदेवतः ।'
एतदन्योत्कृष्टपरम् । नन्दिकेश्वरपुराणे ।
'दत्त्वा नैवेद्यवस्त्रादि नाददीत कथञ्चन ।
भक्तव्यं शिवमुद्दिश्य तदादाने न तत्फलम् ॥'
इति शिवदत्ते विशेषः ।" इत्येकादशीतत्त्वम् ॥
स्वदत्तशिवनैवेद्यस्यापि भक्त्या भक्षणमुक्तं यथा,
"रोगं हरति निर्म्माल्यं शोकन्तु चरणोदकम् ।
अशेषं पातकं हन्ति शम्भोर्नैवेद्यभक्षणम् ॥"
इति शाक्तानन्दतरङ्गिणी ॥
शिवनैवेद्यस्याग्राह्यत्वकारणं यथा,—
राधिकोवाच ।
"एवम्भूतस्य च विभो ! सर्व्वेशस्य महात्मनः ।
न शस्तं कथमुच्छिष्टं ब्रूहि सन्देहभञ्जन ! ॥
श्रीकृष्ण उवाच ।
शृणु देवि ! प्रवक्ष्येऽहमितिहासं पुरातनम् ।